MSS No. 188 Subject Philosophy

Name of MSS विवेक चूडामणि Vivekacudāmani

Author -

Period - - Folios 45

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios - -

विवेकचूडामणि:

ववेकचुडामनी

ॐ श्रीगणेशाय नमः सर्ववेदांतसिद्धांतगोचरं तमगोचरं गोविं
दं परमानंदं सद्गुरुं तं प्रणतोस्म्यहं ॥१॥ जंतूनां नरजन्म दुर्लभमत
तः पुंस्त्वं ततो विप्रता तस्माद्वैदिकधर्ममार्गपरता विद्वत्वमस्मा
त्परं आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिर्मुक्तिर्नो
शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥२॥ दुर्लभं त्रयमेवैत
द्दैवानुग्रहहेतुकं मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥३॥
लब्ध्वा कथंचिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनं य
स्त्वात्ममुक्तौ न यतेत मूढधीः

सत्यात्महा स्वं विनिहंत्यसद्ग्रहात् ॥४॥ इतः कोन्वस्ति मूढात्मा यस्तु स्वा
र्थे प्रमाद्यति दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषं ॥५॥ वदन्तु शास्त्रा
णि यजन्तु देवान्कुर्वन्तु कर्माणि भजन्तु देवताः आत्मैक्यबोधेन विना
निर्मुक्तिर्नसिद्ध्यति ब्रह्मशतान्तरेपि ॥६॥ अमृतत्वस्य नाशास्ति वि
त्तेनेत्येव हि श्रुतिः ब्रवीति कर्मणो मुक्तेरहेतुत्वं स्फुटं यतः ॥७॥
अतो विमुक्त्यै प्रयतेत विद्वान्संन्यस्तबाह्यार्थसुखस्पृहः सन्
संतं महान्तं समुपेत्य देशिकं तेनोपदिष्टार्थसमाहितात्मा

॥८॥ उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ योगारूढत्वमासा
द्य सम्यग्दर्शननिष्ठया ॥९॥ संन्यस्य सर्वकर्माणि भवबंधविमुक्तये यत्य
तां पण्डितैर्धीरैरात्माभ्यासमुपस्थितैः ॥१०॥ चित्तस्य शुद्धये कर्म न त
वस्तूपलब्धये वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥११॥
सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा भ्रान्तोदितमहासर्पभ
यदुःखविनाशनी ॥१२॥ अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः
न स्नानेन न दानेन प्राणायामशतेन वा ॥१३॥ अधिकारिणमाशास्ते फल
सिद्धिर्विशेषतः उपाया देशकालाद्याः संत्यस्मिन्सहकारिणः ॥१४॥

कि

अतोविचारःकर्त्तव्योजिज्ञासोरात्मवस्तुनःसमासाद्यदयासिंधुंगुरुंब्रह्मविदुत्तमं॥
१५॥मेधावीपुरुषोविद्वानूहापोहविचक्षणःअधिकार्यात्मविद्यायामुक्तलक्षण
लक्षितः॥१६॥ विवेकिनोविरक्तस्यशमादिगुणशालिनःमुमुक्षोरेवहिब्रह्मजि
ज्ञासायोग्यतामता॥१७॥साधनान्यत्रचत्वारिकथितानिमनीषिभिःयेषुसत्स्वे
वसन्निष्ठायदभावेनसिध्यति॥१८॥आदौनित्यानित्यवस्तुविवेकःपरिग
ण्यतेइहामुत्रफलभोगविरागस्तदनंतरं॥१९॥शमादिषट्कसंपत्तिर्मु
मुक्षुत्वमितिस्फुटं ब्रह्मसत्यंजगन्मिथ्येत्येवंरूपोविनिश्चयः॥२०॥सोयंनि
त्यानित्यवस्तुविवेकःसमुदाहृतःतद्वैराग्यंजुगुप्सायादर्शनश्रवणा
दिभिः॥२१॥देहादिब्रह्मपर्यंतेह्यनित्येभोग्यवस्तुनिविरज्यविषयव्राताद्दोषदृष्ट्या

मुहुर्मुहुः॥२२॥ स्वलक्ष्ये नियतावस्था मनसः शम उच्यते । विषयेभ्यः परावर्त्य
स्थापनं स्वस्वगोलके॥२३॥ उभयेषामिंद्रियाणां स दमः परिकीर्तितः बा
ह्यानालंबनं वृत्तेरेषोपरतिरुत्तमा॥२४॥ सहनं सर्वदुःखानामप्रतीका
रपूर्वकं चिंताविलापरहितं सा तितिक्षा निगद्यते॥२५॥ शास्त्रस्य गुरुवाक्य
स्य सत्यबुद्ध्यवधारणं सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते॥२६॥
सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा तत्समाधानमित्युक्तं न तु
चित्तस्य लालनं॥२७॥ अहंकारादिदेहांतान्बंधानज्ञानकल्पितान्
स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता॥२८॥ मंदमध्यमरूपापि वै

रागेण शमादिना प्रमादेन गुणोऽस्यैयं प्रवृद्धा सूयते फलं ॥२८॥ वैराग्यं च मुमुक्षु
त्वं तीव्रं यस्य तु विद्यते तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः ॥२९॥ एतयो
र्मन्दता यत्र विरक्तत्वमुमुक्षयोः मरौ सलिलवत्तत्र शमादेर्भानमात्रता ॥३०॥ मो
क्षकारणसामग्र्यां भक्तिरेव गरीयसी स्वस्वरूपानुसंधानं भक्तिरित्यभिधीय
ते ॥३१॥ स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः उक्तसाधनसंपन्नस्त
त्त्वजिज्ञासुरात्मनः ॥३२॥ उपसीदेद्गुरुं प्राज्ञं यस्माद्बन्धविमोक्षणं ॥
श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः ॥३४॥ ब्रह्मण्युपरतः शान्तो नि
रिन्धन इवानलः अहेतुकदयासिन्धुर्बन्धुरानमतां सतां ॥३५॥ तमाराध्य गु
रुं भक्त्या प्रह्वप्रश्रयसेवनैः प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः ॥३६॥

३

मे जगाम

स्वामिन्नमस्तेनतलोकबंधो कारुण्यसिंधो पतितं भवाब्धौ मामुद्धरात्मीयकटाक्षदृष्ट्याऋज्व्यातिकारुण्य सुधाभिवृष्ट्या ॥ ३७ ॥ दुर्वारसंसारदवाग्नितप्तं दोधूयमानं दुरदृष्टवातैः भीतं प्रपन्नं परिपाहि मृत्योः शरण्यमन्यं यदहं न जाने ॥ ३८ ॥ शांतामहांतो निवसंतो वसंतवल्लोकहितं चरंतः तीर्णाः स्वयं भीमभवार्णवं जनानहेतुनान्यानपितारयंतः ॥ ३९ ॥ अयं स्वभावः स्वत एव यत्पर श्रमापनोदप्रवणं महात्मनां सुधांशुरेष स्वयमर्ककर्कशप्रभाभितप्तामवति क्षितिं किल ॥ ४० ॥ ब्रह्मानंद

रस्तानुमतिकलितैः पूतैः सुश्रीतैः पुतैः पुष्पदाङ्कुलक्षणोपित्यैतैः श्रुतिसरवै
र्वीक्ष्यामृतैः सेचयं संतप्तं भवतापदावदहनज्वालभिरेनं प्र
मोघन्यासेभव दीक्षणेक्षणगतैः पात्रीकृताः स्वीकृताः ॥४१॥
कपं तरेयं भवसिंधुमेतं का वा गतिर्मे कतमोस्त्युपायः जाने न किं
चित्कृपया च मां प्रभो संसारदुःखक्षतिमातनुष्व ॥४२॥ तयाव
दं तज्ज्ञारणगतं स्वं संसारदावानलतापतप्तं निरीक्ष्य कारुण्य
रसार्द्रदृष्ट्या दयाद्रमीतिं सहसा मोहात्मनां ॥४३॥ विश्वान्सात

स्मा ३ प सत्ति मी यु षे मुमुक्षवे साधु यथोक्त कारिणे प्रशांत चित्ताय श
मान्विताय तत्वोपदेशं कृपयैव कुर्यात् ॥४॥ मामैष्टविंदं स्तवना
स्युपायः संसार सिंधोस्तरणे स्तुपायः येनैव याता यतयोस्य पा
रं तमेव मार्गं तव निर्दिशामि ॥५॥ श्रीस्त्युपायो महान् कश्चित्संसा
र भय नाशनः तेन तीर्त्वा भवांभोधिं परमानंदमे [illegible] सि ॥६॥
वेदांतार्थ विचारेण जायते ज्ञान मुत्तमं तेनात्यंतिक संसार दुः
ख नाशो भवत्यनु [illegible] ॥७॥ श्रद्धा भक्ति ध्यान योगान्मुमु
क्षो मुक्ते हेतून्वक्ति साक्षाच्छ्रुतेर्गीः यो वा एतेष्वेव तिष्ठत्य

मुख्यमोक्षो विद्याकल्पिताद्देहबंधात् ॥४७॥ अज्ञानयोगात्परमा
त्मनस्तव ह्यनात्मबंधस्तत एव संसृतिः तयोर्विवेकोदितबो
धवह्निरज्ञानकार्यं प्रदहेत्ससूलं ॥४८॥ शिष्यः कृपया श्रूय
तां स्वामिन् प्रश्नोयं क्रियते मया यदुत्तरमहं श्रुत्वा कृतार्थः स्यां
भवन्मुखात् ॥५०॥ को नाम बंधः कथमेष आगतः कथं प्रतिष्ठा
स्य कथं विमोक्षः कोसावनात्मा परमः स्व आत्मा तयोर्विवे
कः कथमेतदुच्यतां ॥५१॥ गुरुः धन्योसि कृतकृत्योसि पावितं ते
कुलं त्वया यदविद्याबंधमुक्त्या ब्रह्मीभवितुमिच्छसि ॥५२॥

ऋणमोचनकर्त्तारः पितुः संति सुतादयः बंधमोचनकर्त्ता तु स्वस्माद
न्यो न कश्चन ५१॥ मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते क्षु
धादिकृतदुःखं तु विना स्वेन न केनचित्तु ५२ पथ्यमौषधसेवी
ना क्रियते येन रोगिणा आरोग्यसिद्धिर्दृष्टास्य नान्यानुष्ठितकर्म
णा॥५३ वस्तुस्वरूपं स्फुटबोधचक्षुषा स्वेनैव वेद्यं न तु पंडितेन
चंद्रस्वरूपं निजचक्षुषैव ज्ञातव्यमन्यैरवगम्यते किं ५४॥
अविद्याकामकर्मादिपाशबंधं विमोचितुं कः शक्नुयाद्विनात्मानं क

त्स्यकोटिशतैरपि ५७ नयोगेननसांख्येनकर्मणानोनविद्यया
ब्रह्मात्मैकत्वबोधेनमोक्षःसिध्यतिनान्यथा ५८ वीणायारूपसौंद
र्यंतंत्रीवादनसौष्ठवं प्रजारंजनमात्रंतन्नसाम्राज्यायकल्पते
५९ वाग्वैखरीशब्दझरीशास्त्रव्याख्यानकौशलं वैदुष्यंवि
दुषांतद्वद्भुक्तयेनतुमुक्तये ६० अविज्ञातेपरेतत्वेशास्त्रा
धीतिस्तुनिष्फलाविज्ञातेपिपरेतत्वेशास्त्राधीतिस्तुनि
ष्फला ६१ शब्दजालंमहारण्यंचित्तभ्रमणकारणं

ओतः प्रपत्नात्वाद्यातवं तत्वज्ञानं तत्वमात्मनः ॥८०॥ अज्ञानसर्पद
ष्टस्य ब्रह्मज्ञानौषधं विना किमु वेदैश्च शास्त्रैश्च किमु
मंत्रैः किमुषधैः ॥८१॥ न मुक्तिर्विना पानं व्याधिरौषध
शब्दतः विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥८२॥ अकृत्वा द
शत्रुसंहारमगत्वाखिलभूश्रियं राजाहमिति शब्दान्नो राजा भव
ते सुहृदि इति ॥८४॥ अकृत्वा दृश्यविलयमज्ञात्वा तत्वमात्मनः बाह्य
शब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणां ॥८३॥

आप्तोक्तिं खननं तथोपरिशिलाद्युत्कर्षणं स्वीकृतिं निक्षेपः
समपेक्षते न हि बहिः शब्दैस्तु निर्गच्छति तद्वद्ब्रह्मविदोपदे
शमननध्यानादिभिर्लभ्यते मायाकार्यतिरोहितं स्वममलं त
त्त्वं न दुर्युक्तिभिः ॥६७॥ तस्मात्सर्वप्रयत्नेन भवबंधविमुक्तये
स्वैरेव यत्नः कर्त्तव्यो रोगादाविव पंडितैः ॥६८॥ यस्त्वयाद्य कृतः प्रश्नो
वरीयांछास्त्रविन्मतः सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमु
क्षुभिः ॥६९॥ शृणुष्वावहितो विद्वन्यन्मया समुदीर्यते तदेत

ह्वणात्तस्याभवबंधाद्विमोक्षस्य से १० मोक्षस्य हेतुः प्रथमो निग
द्यते वैराग्यमेतंतमनित्यवस्तुषु ततः शमश्चापि दमस्तितिक्षा
न्यासः प्रसक्ताखिलकर्मणां भृशं ॥११॥ ततः श्रुतिस्तन्मननं
सतत्वध्यानं चिरं नित्यनिरंतरं मुनेः ततोऽविकल्पं परमेत्य विद्वा
निहैव निर्वाणसुखं समृच्छति १२ यद्बोद्धव्यं तवेदानीमात्माना
त्मविवेचनं तदुच्यते मया सम्यक् श्रुत्वात्मन्यवधारय १३
मज्जास्थिमेदःपललरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितं

यादोरुव धोमुज प्रथमस्तकैरंगै रुपांगैरुपयुक्रमेतत् ॥१४॥
अहं ममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः
नभोनभस्वद्दहनांबुभूमयः सूक्ष्माणि भूतानि भवंति तानि ॥१५॥
परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः
मात्रास्तदीया विषया भवंति शब्दादयः पंच सुखाय भोक्तुः ॥१६॥
य एष्वमूढा विषयेषु बद्धा रागोरुपाशेन सुदुर्दमेन आयां
ति निर्यांत्यध ऊर्ध्वमुच्चैः स्वकर्मदूतेन जवेन नीताः ॥१७॥
शब्दादिभिः पंचभिरेव पंचत्वमापुः स्वगुणेन बद्धाः ॥ ॥

पंच

कुरंगमातंगपतंगमीनभृंगा नरः पंचभिरंचितः किं ॥७७॥ दोषे
णतीव्रो विषयः कृष्णसर्पविषादपि विषं निहंति भोक्तारं द्रष्टा
रं च चक्षुषाप्ययं ॥७८॥ विषयाशामहापाशात् यो विमुक्तः सुदु
स्त्यजात् स एव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि ॥
आपातवैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्य
तः आशाग्रहो मज्जयतेंतराले निगृह्य कंठे विनिवर्त्य वेगात् ॥ नि
८०॥ विषयाख्यग्रहो येन सुविरक्त्यसिना हतः स गच्छति भवांभोधेः
पारं प्रत्यूहवर्जितः ॥८१॥ विषमविषयमार्गैर्गच्छतोनच्छबुद्धेः
प्रतिपदमभियातो मृत्युरप्येष सिद्धः हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या प्रभवति

सत्यमित्येवविद्धि ८२ मोक्षस्यकांक्षायदिचेत्तवास्ति त्यजातिदू
राद्विषयान्विषंयथा पीयूषवत्तोषदयाक्षमार्जवप्रशांतिदांती
र्भजनित्यमादरात् ८४ अनुक्षणंयत्परिहृत्यकृत्यमनाद्यविद्याकृत
बंधमोक्षणं देहः परार्थोयममुष्यपोषणे यः सज्जते स
स्वमनेनहंति शरीरपोषणार्थी सन्य आत्मानंदिदृक्षति
ग्राहंदारुधियाधृत्वा नदींतर्तुंसइच्छति ८६ मोहएवम
हामृत्युर्मुमुक्षोर्वपुरादिषु मोहोविनिर्जितोयेन समुक्ति
पदमर्हति ८७ मोहंजहिमहामृत्युंदेहदारसुतादिषु यंजि

हविषनंतर

त्वामुनयो यांति जद्विद्वांसः परमं पदं ८८ त्वग्मांसरुधिरस्नायु
मेदोमज्जास्थिसंकुलं पूर्णं मूत्रपुरीषाभ्यां स्थूलं निंद्यमिदं
वपुः ८९ पंचीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा
समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ९० अवस्था
जागरस्तस्य स्थूलार्थानुभवो यतः बाह्येंद्रियैः स्थूल
पदार्थसेवां स्रक्चंदनस्त्र्यादिविचित्ररूपां करोति जीवः
स्वयमेतदात्मना तस्मात्प्रशस्तिर्वपुषोस्य जागरे ९१

सर्वोपि बाह्यसंसारः पुरुषस्य यदाश्रयः विद्धि देहमिमं स्थूले
गृहवद्गृहमेधिनः ८७ स्थूलस्य संभवजरामरणानि धर्माः
स्थौल्यादयो बहुविधाः शिशुताद्यवस्थाः वर्णाश्रमादिनिय
मा बहुधामयाः स्युः पूजावमानबहुमानमुखा विशेषाः ८८
बुद्धीन्द्रियाणि श्रवणं त्वगक्षि घ्राणं च जिह्वा विषयावबोध
नात् वाक्पाणिपादा गुदमप्युपस्थः कर्मेन्द्रियाणि प्रवणे
न कर्मसु ८९ निगद्यतेऽन्तःकरणं मनोधीरहंकृतिश्चित्तम
ति स्ववृत्तिभिः मनस्तु संकल्पविकल्पनादिभिः बुद्धिः पदार्थो

ध्यवसायधर्मितः ॥७१॥ अज्ञाभिमानादेहमित्यहंकृतिः स्वा
र्थानुसंधानगुणेन चित्तं ॥७२॥ प्राणापानव्यानोदानसमा
नाभवृत्त्यसौ प्राणः स्वयमेव वृत्तिभेदाद्विकृतिभेदात्सुव
र्णसलिलादिवत् ॥७३॥ वागादिपंच श्रवणादिपंच प्रा
णादिपंचाभ्रमुखानि पंच बुद्ध्याद्यविद्यापि च कामकर्म
णी पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥७४॥ इदं शरीरं शृणु सू
क्ष्मसंज्ञितं लिंगं त्वपंचीकृतभूतसंभवं सवासनं कर्म

चेतनस्य

फलानुभावकं स्वाद्धानतो नादिरूपाधिरात्मनः ९९ स्वमो
मेवत्यसाविभक्त्यवस्थास्वसात्रेशेषएवविभातियत्र स्वप्नेतु
बुद्धिं स्वयमेव जाग्रत्कालीननानाविधवासनाभिः १०० कर्त्रा
दिभावं प्रतिपद्य राजते यत्र स्वयं भाति ह्ययं परात्मा धीमा
त्रकोपाधिरशेषसाक्षी न लिप्यते तत्कृतकर्मलेशैः १०१ य
स्मात्त्वसंगस्तत एव कर्मभिर्न लिप्यते किंचिदुपाधिनाकृतैः सर्व
व्यापृतिकरणं लिंगमिदं स्याच्चिदात्मनः पुंसः वास्यादिकमि
व तक्ष्णस्तेनैवात्मा भवत्यसंगोयं १०२ अंधत्वमंदत्वपटुत्व

कस्मात्स्याकिं एव

धर्माः सौगुण्ये वैगुण्येव शाद्विच ज्ञेषः बोधि यीमकात्व मुखवास्त्र
पैवश्रोत्रादि धर्मा न तु वे तु रामनः १०२ ॥ उच्छ्वास निःश्वास
विजृंभण क्षुत संदना घुकर्म मणादिकाः क्रियाः ज्ञाणादिक
मौ गौव दंति तद्वाः प्राणस्य धर्मा व ज्ञोना पि पासे १०४ ॥ अं
तः करण मे तिष्ठ चु शुरादिष्ववस्था ॥ ग्रै दु मित्यपि मातं
नतिष्ट सौभा संतेत उसा १०५ ॥ अ इं का रुः सविदे यः कर्ता
भौ ज्ञाभि मान्ययं सत्वादि गुण योगतेनचावस्यात्रेय सम्रुते १०६
विषयाणा मानुकूल्ये सखी दुः खी विपर्यये सुखं दुः खं च

तद्रूपैसि सदानंद स्वप्नात्मनः १७ आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रि
यः स्वत एव हि सर्वेषामात्माप्रियतमो यतः १०८ तत आत्मा सदानंदो नास्य
दुःखं कदाचन यः सुषुप्तौ निर्विषय आत्मानंदोऽनुभूयते १०९ श्रुतिः प्र
त्यक्षमैतिह्यमनुमानं च जाग्रति अव्यक्तनाम्नि परमेशक्तिः अनाद्य
विद्या त्रिगुणात्मिका परा कार्यानुमेया सुधियैव माया यया जगत्स
र्वमिदं प्रसूयते १० सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्युभया
त्मिका नो सांगाप्यनंगाप्युभयात्मिका नो महाद्भुतानिर्वच
नीयरूपा १११ शुद्धाद्वयब्रह्मविबोधनाश्या सर्पभ्रमो रज्जु

१२

विवेकज्ञातायथा॥ रजस्तमःसत्वमिति प्रसिद्धागुणास्तदीयाः प्रथितैः
स्वकार्यैः १२ विक्षेपशक्तीरजसःक्रियात्मिकायतः प्रवृत्तिः प्रसृता
पुराणी रागादयोस्याः प्रभवंति नित्यं दुःखादयो ये मनसो विका
राः १३ कामक्रोधौ लोभदंभाभ्यसूयाहंकारेर्ष्यामत्सराद्या
स्तु घोराः धर्माएते राजसाः पुंप्रवृत्तिर्यस्मादेषा तद्रजो बंधहेतुः
१४ एषावृतिर्नामतमोगुणस्यशक्तिर्यथावस्त्ववभासतेन्यथा
सैषानिदानंपुरुषस्यसंसृतेर्विक्षेपशक्तेःप्रवणस्यहेतुः १५
प्रज्ञावानपि पंडितोपि चतुरोप्यत्यंतसूक्ष्मार्थदृग्व्यालीढस्त

मस्मानवेजिव दुधा संवेधितोपि स्फुटं भ्रांत्या रोपितमेव साधुकलयंत्या
लंबतेन दुणान्सता सौ प्रबलादुरंततमसः इति मे दापावृत्तिः १६
श्रीभावनावाविपरीतभावनासंभावनाविप्रतिदेन्या संसर्गयुतो
नविमुंचति ध्रुवं विक्षेपज्ञातिः क्षपयंत्यजस्त्र ११ सज्ञानमालस्य
जेउ तनि दोषप्रमादमूढत्वमुख्यास्तमोगुणाः एते: अयुतो
नरिवेति किंचित्रिन्दालुवन्संभवदेवति इति १८ सोवं विशुद्धं जल
वत्र यापितान्त्यां मिलितासरणीयकल्पनोपज्ञात्मविवेकः प्रति

विपरीय संसा विवाद निरंतर कर्य भवति रजस्तम जिसस्तविवेक

विवितः सत्त्वप्रकाशायनमीदृग्वारिवलं जन्तुः ॥१५ मिश्रस्य सत्त्वस्य भवंति धर्मास्त्व
मानिता यानियमाद्या श्रद्धा च भक्तिश्च मुमुक्षुता च दैवी च सं
पत्तिरसन्निवृत्तिः ॥ विशुद्धसत्त्वस्य गुणाः प्रसादः स्वात्मानु
भूतिः परमा प्रशांतिः तृप्तिः प्रहर्षः परमात्मनिष्ठा यया सदा
नंदरसं समृच्छति ॥१२१॥ अव्यक्तमेतत्त्रिगुणैर्निरुक्तं तत्कारणं नाम शरी
भवति रमात्मनः सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीनसर्वेंद्रियबुद्धिवृत्तिः ॥१२२
सर्वप्रकारप्रमितिप्रशांति बीजात्मनावस्थितिरेव बुद्धेः सुषुप्तिरेतस्य
किल प्रतीतिः किंचिन्न वेद्मीति जगत्प्रसिद्धेः ॥१२३॥ देहेंद्रियप्राण

मनो दमादयः सर्वे विकारा विषयाः सुखादयः व्योमादिभूतान्यखि
लं चैव स्वप्नवज्ज्ञापयेत्तमिदं सर्वमनात्मा ॥१७॥ मायामायाकार्यं सर्वं मह
दादि देहपर्यंतम् असदिदमनात्मकं त्वं विद्धि मरुमरीचिकाकल्पं
॥१८॥ अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः यद्विज्ञाय नरो बंधान्मु
क्तः कैवल्यमश्नुते ॥१९॥ अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययलंबनः अवस्था
त्रयसाक्षी सन्पंचकोशविलक्षणः ॥२०॥ यो विजानाति सकलं जाग्रत्स्वप्न
सुषुप्तिषु बुद्धितद्वृत्तिसद्भावमभावमहमित्ययं ॥२१॥ यः पश्यति स्वयं
सर्वं यं न पश्यति किंचन यश्चेतयति बुद्ध्यादि न तं यं चेतयत्ययं ॥२२॥

येनविश्वमिदंव्याप्तंयन्नव्याप्नोतिकिंचन। आभारूपमिदंसर्वंयंभांतम
नुभात्ययं॥१॥ यस्यसन्निधिमात्रेण देहेंद्रियमनोधियः। विषयेषुस्व
कीयेषुवर्तंतेप्रेरिताइव॥२॥ अहंकारादिदेहांताविषयाश्चसुखा
दयः। वेद्यंतेयेननित्यबोधस्वरूपिणः॥३॥ एषांतरात्मा
पुरुषः पुराणोनिरंतरानंदसुखानुभूतिः सदैकरूपःप्रतिबोध
मात्रो येनेषितावागसवश्चरंति॥४॥ अत्रैवसत्त्वात्मनि धीगुहाया
मव्याकृताकाशउरुप्रकाशः। आकाश उच्चैरविवत्प्रकाशतेस्वतेज
साविश्वमिदंप्रकाशयन्॥५॥ ज्ञातामनोहंकृतिविक्रियाणां

देहेंद्रियप्राणकृतक्रियाणां अयोग्निवत्ताननुवर्त्तमानो न चेष्टते नो
विकरोति किंचन ॥१३७॥ न जायते नो म्रियते न वर्द्धते न क्षीयते नो विक
रोति नित्यः विलीयमानेपि वपुष्यमुष्मिन्न लीयते कुंभइवांबरं स्वयं
॥१३८॥ प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः सदसदिदमशेषं भासय
न्निर्विशेषः विलसति परमात्मा जाग्रदादिष्ववस्थास्वहमहमिति
साक्षात्साक्षिरूपेण बुद्धेः ॥१३९॥ नियमितमनसामुं त्वं स्वमात्मान
मात्मन्ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात् जनिमरणतरंगा
पारसंसारसिंधुं प्रतरभव कृतार्थो ब्रह्मरूपेण संस्थः ॥१४०॥

गेऽज्ञानात्मन्यहमिति मतिर्बंध एषोऽस्य पुंसः प्राप्तोऽज्ञानाज्जननमरणक्लेशसं
पातहेतुः येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या पुष्यत्युक्षत्यवति
विषयैस्तंतुभिः कोशकृद्वत् ॥१५॥ अतस्मिंस्तद्बुद्धिः प्रभवति विमूढ
स्य तमसा विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा ततोऽनर्थव्रातो
निपतति समादातुरधिकस्ततो योऽसद्ग्राहः स हि भवति बंधः शृणु सखे ॥१६॥
ऽखंडनित्याद्वयबोधशक्त्या स्फुरंतमात्मानमनंतवैभवं समावृणो
त्यावृतिशक्तिरेषा तमोमयी राहुरिवार्कबिंबं ॥१७॥ तिरोभूते स्वा
त्मन्यमलतरतेजोवति पुमाननात्मानं मोहादहमिति शरीरं कलयति

ततः कामक्रोधप्रभृतिभिरनुबंधनगुणैः परं विद्वेषपारव्यारजसत्रुत्रस्त्री
तिर्व्यपयति ॥१४॥ महामोहग्राहग्रसनेगलितात्मावगमनोधियोना
नीवस्यां स्वयमभिनयं स्तु अज्ञानपाशपरेसंसारेविषयविषदरे
जलनिधौनिमज्ज्योन्मज्ज्यायंश्रमितकुमतिः कुत्सितगतिः ॥१५॥ भानुप्रभासं
ज्ञानतान्त्रयंतिभीनुतिरोधायविजृंभनैस्तयया ज्ञातोदितांदु कुनिराशतवं
तपातिरोधायविजृंभनेस्वयं ॥१६॥ कवलितदिननाथेदुर्दिनेसान्द्रमेघैर्व्य
पयतिहि महांशानागुरुयोयथैताम् अविरततमसान्यान्याद्वजेसरु
वर्द्धिष्णुपयतिवअंतुः रैवस्तीव्रविक्षेपशक्तिः ॥१७॥ एताभ्यामेवशक्तिभ्यां

किञ्चात पा.र.श्रा

बंधः पुंसः समागतः याभ्यां विमोहितो देहं मत्वात्मानं भ्रमत्ययं ॥१८
बीजं संसृतिभूमिजस्य तु तमो देहात्मधीरंकुरो रागः प
ल्लवमंबु कर्म तु वपुः स्कंधो सवः शाखिकाः अग्राणींद्रियसंहति
श्च विषयाः पुष्पाणि दुःखं फलं नानाकर्मसमुद्भवं बहुविधं भोक्तात्र
जीवः खगः ॥१४७ अज्ञानमूलोयमनात्मबंधो नैसर्गिकोनादिरनंत
ईरितः जन्माप्ययव्याधिजरादिदुःखप्रवाहपातं जनयत्यमुष्य ॥१४८ पोर श्रा
नास्त्रैर्न शस्त्रैरनिलेन वह्निना छेत्तुं न शक्यो न च कर्मकोटिभिः विवेकवि

१ मूल अनात्म बंधा

ज्ञानमहासिना विनाधा तु प्रसादेन शितेन मंजुना ।१८। श्रुतिप्रमाणैक
मतेः स्वधर्मनिष्ठानतयैवात्मविशुद्धिरस्य विशुद्धबुद्धेः परमात्म
वेदनं तेनैव संसारसमूलनाशः ।१९। कोशैरन्नमयाद्यैः पंच
भिरात्मा न संवृतो भाति निजशक्तिसमुत्पन्नैः शैवालपटलैरिवांबु वापीस्थं ॥
।१९। तच्छैवालापनये सम्यक् सलिलं प्रतीयते शुद्धं तृष्णासंतापहरं
सद्यः सौख्यप्रदं परं पुंसः ।१२। पंचानामपि कोशानामपवादे विभात्य
यं शुद्धः नित्यानंदैकरसः प्रत्यग्रूपः परः स्वयं ज्योतिः ।१२। आत्मा
नात्मविवेकः कर्तव्यो बंधमुक्तये विदुषा तेनैवानंदी भवति स्वं विज्ञाय सच्चि

स

दानं दे १५४ मुंजादिषीकामिव दृश्यवर्गात्प्रत्यंचमात्मानमसंगमक्रि
यं विविच्य तत्र प्रविलाप्य सर्वं तदात्मना तिष्ठति यः स मुक्तः १५५
देहोयमन्नभवनोन्नमयस्तु कोशश्चान्नेन जीवति विनश्यति त
द्विहीनः त्वक्चर्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितु
मर्हति नित्यशुद्धः १५६ पूर्वं जनेरपि मृतेरपि नायमस्ति जातक्षण
क्षणगुणोनियतस्वभावः नैको जडश्च घटवत्परिदृश्यमानः
स्वात्मा कथं भवति भावविकारवेत्ता १५७ पाणिपादादिमान्देहो ना

त्मियं गोपि जीववनात् तज्जडत्वेरनाद्या ऋनानियम्यानियामकः १५८ देह
तद्धर्मैतत्कर्मैतदवस्थादिसाक्षिणः स्वत एव स्वतः सिद्धं तद्वैलक्षण्य
मात्मनः १५९ शाल्यराशिर्मांसलिप्तो मलपूर्णोतिकश्मलः कथंभवे
देयं वेत्तास्वयमेतद्विलक्षणः १६० त्वगासमेदोस्थिपुरीषराशा
वहंमतिं मूढजनः करोति विलक्षणं वेत्ति विचारशीलो निजस्व
रूपंपरमार्थभूतं १६१ देहोहमित्येव जडस्य बुद्धिर्देहे च जी
वे विदुषस्त्वहंधीः विवेकविज्ञानवतो महात्मनो ब्रह्माह

बरा

मित्येव मतिः सदात्मनि ॥१८२॥ अत्रात्मबुद्धिं त्यज मूढबुद्धे त्वङ्मांस
मेदोस्थिपुरीषरौ सर्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शांतिं परमां
भजस्व ॥१८३॥ देहेंद्रियादावसति भ्रमोदितां विद्वानहंतां न जहा
ति यावत् तावन्न तस्यास्ति विमुक्तिवार्ताप्यस्त्वेष वेदांतनयांतद
र्शी ॥१८४॥ छायाशरीरे प्रतिबिंबगात्रे यत्स्वप्नदेहे हृदिकल्पितांगे य
थात्मबुद्धिस्तव नास्ति काचिज्जीवच्छरीरे च तथैव मास्तु ॥१८५॥
देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य बीजं

यतस्ततः स्वं जगदितां अयत्नात्त्यक्ते तु विजेन पुनर्भवाश्या ॥९६॥ कर्मेंद्रियैः
पंचभिरंचितोयं प्राणो भवेत्प्राणमयस्तु कोशः येनात्मवानन्नम
योनुपूर्णः प्रवर्त्ततेसौ सकलक्रियासु ॥९७॥ नैवात्मापि प्राणमयो वायु
विकारो गंता गंता वायुवदंतर्वहिरेषः यस्मात्किंचित्क्वापि न वेत्ती
ष्टमनिष्टं स्वं वान्यं वा किंचन नित्यं परतंत्रः ॥९८॥ ज्ञानेंद्रियाणि च मन
श्च मनोमयः स्यात्कोशो ममाहमिति वस्तुविकल्पहेतुः संज्ञादि
भेदकलनाकलितो बलीयां स्तत्पूर्वकोशमभिपूर्य विजृंभते यः

२०

१९॥ पंचेंद्रियैः पंचभिरेव देहो जन्मिः प्रचीयमानो विषयान्सुधारया जाग्रत्समानो बहुधा मनैर्धनैर्मनो मयो यागितर्देहइति प्रपंचं ॥२०॥ नसत्त्वसविद्यामनसोतिरिक्ता मनो ह्यविद्या भवबंधहेतुः तस्मिन्विनष्टे सकलं विनष्टं विजृंभते तस्मिन्सकलं विजृंभते ॥२१॥ स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या भोक्त्रादि विश्वं मनएव सर्वं तथैव जाग्रत्यपि नो विशेषस्तत्सर्वमेतन्मनसो विजृंभणं ॥२२॥ सुषुप्तिकाले मनसि प्रलीने नैवास्ति किंचित्सकलप्रसिद्धेः अतो मनःकल्पित एव पुंसः संसारएतस्य न वस्तुतोऽस्ति ॥२३॥ वायुनानीयते मेघः पुनस्तेनैव नीयते मनसा

ल

कल्प्यते बंधो मोक्षस्तेनैव कल्प्यते ॥१७॥ देहादि सर्व विषये परि
कल्प्य रागं बध्नाति तेन पुरुषं पशुवद्गुणेन वैरस्यमत्र विषवत्सु
विधाय पश्चाद्देनं विमोचयति तन्मन एव बंधात् ॥१८॥ तस्मान्मनः
कारणमस्य जंतोर्बंधस्य मोक्षस्य च वा विधाने बंधस्य हेतुर्मलि
नं रजोगुणैर्मोक्षस्य शुद्धं विरजस्तमस्कं ॥१९॥ विवेक वैराग्य गुणाति
रेकाच्छुद्धत्वमासाद्य मनो विमुक्त्यै भवत्यतो बुद्धिमतो मुमुक्षो
स्ताभ्यां दृढाभ्यां भवितव्यमग्रे ॥२०॥ मनो नाम महाव्याघ्रो विष
यारण्यभूमिषु चरत्यत्र न गच्छंतु साधवो ये मुमुक्षवः ॥२१॥

मनः श्रेष्ठेन विषयान भोग्यान्स्थूलान्मनासक्तं तया च भोक्तुः शरीन
वर्णाश्रमजातिभेदानुगुण्यक्रियाहेतुफलानिनिनंस ७८ ॥ असंगवित्वुप
समुविमोस्य देहद्विप्राण गुणैर्निबध्यमाहंसभैति ममयत्सजस
मनः स्वकृत्ये पुफलोपभुक्ति पु ८० ॥ अध्यासतो दोषास्तु मनष स्यसंसृतिर
ध्यासबंधस्तु मुनैव कल्पितः रजस्तमो दाबवतोविवेकिनो जन्मा
दि दुःखस्य निदानमेतत ८१ ॥ अतः प्राहुर्मनोविद्यां पंडितास्तत्वदर्शि
नः येनैव भाम्यतेविद्वंसंवा युनेवाभ्रमंडलं ८२ जन्मनः शोधनं कार्यं ॥

प्रयत्नेन मुमुक्षुणा विशुद्धे सति चैतस्मिन्मुक्तिः करफलायते ॥ ८३ ॥ मो
क्षैकसक्त्या विषयेषु रागं निर्मूल्य सन्न्यस्य च सर्वकर्म सच्छ्रद्धया यः
श्रवणादिनिष्ठो रजःस्वभावं स धुनोति बुद्धेः ॥ ८४ ॥ मनोमयो नापि भवे
त्परात्मा ह्याद्यन्तवत्त्वात्परिणामिभावात् दुःखात्मकत्वाद्विषयत्वहे
तो द्रष्टा हि दृश्यात्मतया न दृष्टः ॥ ८५ ॥ बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः
कर्तृलक्षणः विज्ञानमयकोशः स्यात् पुंसः संसारकारणं ॥ ८६ ॥ अनुव्र
जच्चित्प्रतिबिंबशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः ज्ञानक्रियावानहं

मित्यजस्वंदेदेहेंद्रियादिष्वभिमन्यते॥९७॥ अनादिकालोयमहंस्व
भावोजीवः समस्तव्यवहारवोढा करोतिकर्माण्यपिपूर्ववासनः पुण्या
न्यपुण्यानिचतत्फलानि॥९८॥ भुंक्तेविचित्रास्वपियोनिषुव्रजन्नायातिनि
यात्यधऊर्ध्वमेषः अस्यैवविज्ञानमयस्यजाग्रत्स्वप्नाद्यवस्थासुख
दुःखभोगः॥९९॥ देहादिनिष्ठाश्रमधर्मकर्मगुणाभिमानः सततंममेति
विज्ञानकोशोयमतिप्रकाशः प्रकृष्टसान्निध्यवशात्परात्मनः
॥१००॥ अतोभवत्येषउपाधिरस्ययदात्मधीः संसरतिभ्रमेण

यो यं विद्वान् मयः प्राणेषु हृदि स्फुरन्स्वयं ज्योतिः कूटस्थः सोन्तात्माक
र्ता भोक्ता भवत्युपाधिस्थः ५१ स्वयं परिच्छेदमुपेत्य बुद्धेस्तादात्म्य दोष
एण परं मृषात्मनः सर्वात्मकः सन्नपि वीक्षते स्वं स्वतः पृथक्त्वेन मृदो घ
टानिव ५२ ॥ उपाधिसंबंधवशात्परात्मा ह्युपाधिधर्माननुभाति तद्गुणः
अयो विकारानविकारिवह्निवत्सदैकरूपोपि परः स्वभावात् ५३
शिष्यः भ्रमेणाप्यन्यथा वास्तु जीवभावः परात्मनः तदुपाधेरनादि
त्वान्नानादेर्नाश इष्यते ५४ अतोस्य जीवभावोपि नित्यो भवति संसृतिः
न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद ५५

गुरुतः सम्यक्श्रुत्वैव याविदन्यावधानेन तत्क्षण प्रामाणिकी न भवति भ्रांत्या
रोपितकल्पना ५२ भ्रांतिं विना त्वसंगस्य निष्क्रियस्य निराकृतेः न घटेता
त्मसंबंधो नभसो नीलतादिवत् ५३ स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य
प्रत्यग्बोधानंदरूपस्य बुद्धेः भ्रांत्या प्राप्तो जीवभावो न सत्यो मोहा
पायेनास्त्यवस्तुस्वभावात् ५४ यावद्भ्रांतिस्तावदेवास्य सत्ता
मिथ्याज्ञानोज्जृंभितस्य प्रमादात् रज्ज्वां सर्पो भ्रांतिकालीन एव भ्रां
तेर्नाशे नैव सर्पोऽस्ति तद्वत् ५५ अनादित्वमविद्यायाः कार्यस्या

पितपेण्यते उत्पन्नायां तु विद्यायामविद्यकमनाद्यपि २०० प्रबोधे
स्वप्नवत्सर्वं सहमूलं विनश्यति अनाद्यपीदं नो नित्यं प्रागभाववद्
वस्फुटं २१ अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः यद्बुद्ध्युपा
धिसंबंधात्परिकल्पितमात्मनि २०२ जीवत्वं न ततोऽन्यत्तु स्वरूपेण वि
लक्षणं संबंधस्त्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः २०३ विनिवृत्ति
र्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा ब्रह्मात्मैकत्वविज्ञानं स
म्यग्ज्ञानं श्रुतेर्मतं ४ तदात्मानात्मनोः सम्यग्विवेकेनैव सि

२४

इति ततो विवेकः कर्तव्यः प्रत्यगात्मसदात्मनोः ५ जलपंकवद
संततं पंकापाये जलं स्फुटं ६ प्रसक्तितो नु सदात्मनः स्फुटत्व
मीति रेतस्य भवेत्तत्र नीचैः ततो निरासः करणीय एवासदात्म
नः साध्ये हृमादि वस्तुनः ७ अज्ञानोपपरात्मा स्यादि ज्ञानमय
शब्दभाक् विकारित्वाच्च उत्पाद्य परिछिन्नत्व हेतुतः ८ दृश्यत्वा
द्व्यभिचारित्वाल्लीन स्यानित्य इष्यते ९ आनंदमय जीवाद्युति
तनुर्वृत्तिकाम्य मोऽजेमितास्यादानंदमयः प्रियादि गुणकः स्वप्र
यत्नादयः पुण्य साहत्य वेविभाति कृतिनामानंदरूपः स्वयं भवत्वा
ला

ने दृत्तिर्यत्र साधुस्तनुमन्मात्रः प्रयत्नं विना ८ आनंदमयकोशस्सु
षुप्तौ स्फूर्तिस्सत्कटा स्वप्नजागरयोरीषदिष्टसंदर्शनादिना २१० ने
चायमानंदमयः परात्मा सोपाधिकत्वात्स कृतेर्विकारात् कार्यत्वहे
तोः सुकृतक्रियाया विकारसंघातसमाहितत्वात् २११ पंचानाम
पि कोशानां निषेधे युक्तितः श्रुतेः तन्निषेधावधिः साक्षी बोधरूपो
वशिष्यते १२ योयमात्मा स्वयंज्योतिः पंचकोशविलक्षणः अवस्था
त्रयसाक्षी सन्निर्विकारो निरंजनः १३ सदानंदः स विज्ञेयः स्वा
त्मत्वेन विपश्चिता सि[illegible]ः मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पंचसु

१४ सर्वो भावो विना किंचिन्न प्रकाश्यते देगुरो विद्येयं किं मुधा स्वस्ति
स्वात्मनानवि पृश्चिता ।।१५।। गुरुः सत्यमुक्तं त्वया विद्वन्निपुणोसि विचा
रणे अहमादिविकारास्तेतदभावोयमप्यय ।।१६।। सर्वे येनानुभूयंते
यः स्वयं नानुभूयते तमात्मानं वेदितारं विद्धि बुद्ध्या सुसूक्ष्मया ।।१७।। त
त्साक्षिकं भवेत्तत्तद्यद्येनानुभूयते कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते
१८ असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते अतः परं स्वयं साक्षा
त्प्रत्यगात्मा न चेतरः ।।१९।। जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योसौ समुज्जृं
भते प्रत्यग्रूपतया सदाहमहमित्यंतः स्फुरन्नैकधा नानाकारविका

रमात्मनि नइमात्म्यस्वल्प हृधीमुखवान् नित्यानंदचिदात्मना स्फुरंतं विद्धि स्वमेतं हृ
दि २२१ घटोदके बिंबितमर्कबिंबमालोक्य मूढो रविमेव मन्यते तथा चिदाभा
समुपाधिसंस्थं भ्रांत्याहमित्येव जडोभिमन्यते २२२ घटं जलं तद्गतमर्कबिं
बं विहाय सर्वं विनिवीक्ष्यतेर्कः तटस्थ एतत्त्रितयावभासकः स्वयंप्रकाशो
विदुषा यथा तथा २२३ देहं धियं चित्प्रतिबिंबमेवं विसृज्य बुद्धौ निहितं गुहा
यां द्रष्टारमात्मानमखंडबोधं सर्वप्रकाशं सदसद्विलक्षणं २४ नित्यं
विभुं सर्वगतं सुसूक्ष्मं अंतर्बहिःशून्यमनन्यमात्मनः विज्ञाय सम्यङ्नि
जरूपमेतत् पुमान् विपाप्मा विरजो विमृत्युः २२५ विशोक आनंदघनो विप
श्चित्स्वयं कुतश्चिन्न बिभेति कश्चित् नान्योस्ति पंथा भवबंधमुक्तेर्विना स्वत

त्वावगमं मुमुक्षोः २५ ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणं
येनाद्वितीयमानंदं ब्रह्म संपद्यते बुधः २६ ब्रह्मभूतस्तु संस
त्यै विद्वान्नावर्त्तते पुनः विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमा
त्मनः २७ सत्यं ज्ञानमनंतं ब्रह्म विशुद्धं परं स्वतः सिद्धं नित्या
नंदैकरसं प्रत्यगभिन्नं निरंतरं जयति २८ सदिदं परमा
द्वैतं स्वस्मादन्यस्य वस्तुनोभावात् न ह्यन्यदस्ति किंचि
त्सम्यक्परमार्थतत्त्वबोधदशायां २९ यदिदं सकलं वि
श्वं नानारूपं प्रतीतमज्ञानात् तत्सर्वं ब्रह्मैव प्रत्यस्ताशे

षभावनादोषं अमत्कार्यमज्ञोपि मृदोनभिन्नः कुंभोस्ति सर्व
त्रतु मृत्स्वरूपात् न कुंभरूपं पृथगस्ति कुंभः कुतोमृषा कल्पित
नाममात्रः २२ केनापि मृद्भिन्नतया स्वरूपं घटस्य संदर्शयितु
नशक्यते अतो घटः कल्पित एव मोहान्मृदेव सत्यं परमार्थ
भूतं २३ सद्ब्रह्मकार्यं सकलं सदेव सन्मात्रमेतन्न ततोन्यद
स्ति अस्तीति यो वक्तिन तस्य मोहो विनिर्गतो निद्रितवत्प्रजल्पः
२४ ब्रह्मैवेदं विश्वमित्येव वाणी श्रौती ब्रूतेथर्वनिष्ठा वरिष्ठा तस्मा
त्सर्वं ब्रह्ममात्रं हि विश्वं नाधिष्ठानाद्भिन्नतारोपितस्य २५

सत्त्वं यदि स्यात्तज्जस देत दामिनानं तत्त्व हानिर्विगमा मा स मा एता
त्मा सत्त्ववादित्व स पीयितुः स्यान्नैतत्तत्र यं साधु हितं स हात्मनां २६ ई
श्वरो वस्तुतत्त्व ज्ञान चादेतेश्वर स्थितः नच स त्स्याभिमता
नीत्येव मे वव्यू विकथतत २७ यदि सत्त्व म वेदि स्वं सुष्ठु प्राव
पलभ्यतां पन्नो पलभ्यते किं विदन्तो सत्स्व सुखवन्मुखा २८ भूतः
प्रपञ्चास्ति जगत्प्रात्मनः प्रपञ्च ता जि त्सु सु पा गुणादि वत्
आरोपितं स्याक्ति किम येवत्तापि द्यान सामाति तथा मे सेए २८
भ्रांत स्व य य त्र स ततः प्रतीते त्रलोवतत त्र त्रतौसिसुक्तिः

इदंतया ब्रह्मसदैवरूप्यते त्वारोपितं ब्रह्मणी नाम समाते २४ अ
तः परं ब्रह्मसदद्वितीयं विशुद्धविज्ञानघनं निरंजनं प्रशांत
माद्यंतविहीन मक्रियं निरंतरानंदरसस्वरूपं २५ निर
स्तमायाकृतसर्वभेदं नित्यं ध्रुवं निष्कलमप्रमेयं अरूपम
व्यक्तमनाख्यमव्ययं ज्योतिः स्वयं किंचिदिदं चकास्ति २६ ज्ञा
त्क्वानन्दोय शून्यमनंतनिर्विकल्पकं केवलाख्यं अचिन्त्यात्म
परं तत्त्वं विदुर्बुधाः २७ असेय मनुयादेयं मनोवाचामगोचरं
अप्रमेयमनाद्यंतं ब्रह्मपूर्णमहन्महः २८ तत्त्वं पदाभ्यां समभिधीय

विं
मानयोर्ब्रह्मात्मनोः शोधितयोर्यदित्थं त्वपात्तयोरात्मत्वमसी
ति सम्यगेकत्वमेव प्रतिपाद्यते मुमुक्षुंं । कं चितयोर्लक्षितयोर्न
वाच्ययोर्निगद्यतेन्योन्यविरुद्धधर्मिणोः स्वद्योत भान्वोरिव
राजभृत्ययोः कूपांबुराश्योः परमाणुमेर्वोः ५८ तयोर्विरो
धो यमुपाधिकल्पितो न वास्तवः कश्चिदुपाधिरेषः ईशस्य
माया महदादिकारणं जीवस्य कार्यं शृणु पंचकोशाः ५९ एता
वुपाधी परजीवयोस्तयोः सम्यङ्निरासेन परोन जीवः
राज्यं नरेंद्रस्य भटस्य खेटकस्तयोरपोहेन भटो न राजा ६०

अथातआदेश इति श्रुतिः स्व यं नि षे धति ब्रू ल ए क लिं द्व यं श्रु ति त मा ण नु ही

त वो धा त यो निं रा सः क र णी य ए वं २७८ ने दं ने दं क लि त ला न स

तं रे णु ह ष्व व्या ल व स्व प्र व ञ्च ध्वन्त स्वं सा धु यु क्त्या व पो ह्य हे यः प

श्चा दे क भा व स्तो यो धीः ५० त त स्तु तो ल स ए या सु ल दौ त यो

र स्वं उ क र स त सि ञ ये ना ले ज ह त्या न त था त ह्न सा किं तु

भ या धी मि क ये व भा वो ५ स दे व द तो य भि तो द चे क ना

वि रु द्ध नी श्च म पा सा कथ्य ते य था त था त त म सी ति वा

क्ये वि त ध्य घ सा नु भ य त्र हि ता ५२ सं ल ह्म चि ना त त या

सदात्मनोरखंडभावः परिचीयते बुधैः एवं सदावाक्यश्रि
तेन कथ्यते ब्रह्मात्मनोरैक्यमखंडभावः ५३ आस्थूल
मित्यतदसन्निरस्य सिद्धं स्वतो व्योमवदप्रतर्क्यं अतो
मृषामात्रमिदं प्रतीतं जहीहि यत्स्वात्मतया गृहीतं ५४
ब्रह्माहमित्येव विशुद्धबुद्ध्या विद्धि स्वमात्मानमखंड
बोधं मृत्कार्यं सकलं घटादि सततं मृन्मात्रमेवाभि
तस्तद्वत्सज्जनितं सदात्मकमिदं सन्मात्रमेवाखिलं ५५ य
स्मान्नास्ति सतः परं किमपि तत्सत्यं स आत्मा स्वयं तस्मात्तत्व

मसि प्रशांतमसमलं ब्रह्माद्वयं यत्परं निद्राकल्पितदेशकालविषयज्ञात्रादि सर्वं यया मिथ्यात द्वहिरप्यपि जाग्रति जगत्स्वात्मानकार्यं वततः ५६ यस्माद्देव मिदं शरीर करणप्राणं ऋसाद्यव्यसत्तस्मात्तत्त्व मसि प्रशांतमसमलं ब्रह्माद्वयं यत्परं जातिनीतिकुलगोत्रदूरगंनामरूपगुणदोषवर्जितं देशकालविषयातिवर्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि ५७ यत्परं सकलवागगोचरं गोचरं विमलबोधचक्षुषः शुद्धचिद्घनमनादि वस्तु यद्ब्रह्म तत्त्वमसि भावयात्मनि ५८ षड्भिरूर्मिभिरयोगियोगिहृद्भा

२०

वितंनकेरणैर्विमावितं वुद्धवेद्यमेनवद्यमत्तियद्दुल्लतं ५
भ्रांतिकलितजगकलाश्रयं स्वाश्रयंचसदसद्विलक्षणंनिष्क
लंनिरूपमानवृद्धियद्रुहल्लतं ६० जन्मवृद्धिपरिणामयच्या
धिनाशवविहिनमव्ययंविश्वसृष्ट्यवनिघातकारणंव्रल्लतं ६१
श्रस्तभेदमनपास्तलक्षणंनिस्तरंगजलराशिनिश्च
लंनिरूपमृतमविमत्तमर्त्तियद्रुहल्लतं ६२ एकमेवसद
नेककारणंकारणांतरेनिरास्यकारणंकार्यकारणविल

ज्ञाणं स्वयं ब्रह्मतत् ॥६५॥ निर्विकल्पकमनल्पमक्षारं यक्षराक्ष
रविलक्षणं परं नित्यमव्ययसुखं निरंजनं ब्रह्मतत् ॥६४
यद्विभाति सदनेकधा भ्रमान्नामरूपगुणविक्रियात्मना
हेमवत्स्वयमविक्रियं सदा ब्रह्मतत् ॥६५ यत्र्व कासान पर
ं परात्परं प्रत्यगेकरसमात्मलक्षणं सत्यचित्सुखमनं
त मव्ययं ब्रह्मतत्त्वमसि भावयात्मनि ॥६६ उक्तमर्थमि
वचात्मनि स्वयं भावयेत्प्रथितयुक्तिभिर्धिया संशया
दिरहितं करांबुवत् तेन तत्त्वनिगमो भविष्यति ६७

संबोधमात्रं परिशुद्धतत्त्वं विज्ञाय संघेन पवच्चसैन्येतदा
त्मिनैवात्मनि संवीदास्थितो विलापयय ब्रह्मणि दृश्यजातं ६८
बुधो गुहायां सदसद्विलक्षणं ब्रह्मास्ति सत्यं परम
द्वितीयं तदात्मना योत्रवसेद्गुहायां पुनर्न तस्यांगगुहा
प्रवेशः ॥६९॥ ज्ञाते वस्तुन्यपि बलवती वासनानादिरे
षा कर्ता भोक्ताप्यहमिति दृढा यास्य संसारहेतुः
प्रत्यग्दृष्ट्यात्मनि निवसता सापनेया प्रयत्नान्मुक्तिं प्राहुस्तदिह

स्य क्ता

मुनयो वासनाजातानेवं यत्र २० आसंसमेमेति यो भावो देहस्य कादाचना
त्सति अध्यासो यं निरस्तव्यो विदुषा स्वात्मनि इया २१ ह्रात्वा
स्वप्रस्य गात्मानं बुद्धितद्वृत्ति साक्षिणं सोहमिसेव सद्
त्मा स्वान्यत्रात्म मतिं जहि २२ लोकानुवर्तनं सत्का देहानुव
र्तनं शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु २३ लोक
वासनया जन्तोः शास्त्रवासनयापि च देहवासनया ज्ञानं यथा
वन्नैव जायते २४ संसारकारागृहमोक्षमिच्छोरयोमयं पादनिबंध
शृंखलं वदंति तज्ज्ञाः पटु वासनात्रयं यस्माद्विमुक्तिसमुपैति मुक्तिं २५

जालादिसंपर्कवशात्प्रभूतदुर्गंधधूजागरूदिव्यवासनासंघर्षणे
नैव विभाति सम्मि[illegible]धूयमाने सति वा सुगंधे १६ अतः श्रुतानंतदु
रंतवासनाधूलीविलिसापरमात्मवासनाप्रज्ञातिसंघर्षण
नैव विशुद्धा प्रतीयते चंदनगंधवत्स्फुटं १७ अनात्मवासनजा
लेस्तिरोभूतात्मवासनानित्यात्मनि प्रयतेषांनाशे भाति स्वयं
स्फुटं १८ यथा यथा प्रत्यगवस्थितं मनस्तथा तथा मुंचति
वाह्यवासनाः निःशेषमोक्षे सति वासनानामात्मानुभूतिः प्रति
बंधशून्या १९ स्वात्मन्येव सदास्थित्या मनोनश्यति योगिनः वासना

नां क्षय यस्मातः स्वाध्यासापनयं कुरु २८० तमोद्वाभ्यां रजः सत्वात्सत्वं शुद्धेन न
श्यति तस्मात्सत्वमवष्टभ्य स्वाध्यासा० ८१ प्रारब्धं पुष्यति वपुरिति निश्चित्य नि
श्चलः धैर्यमालंब्य यत्नेन स्वाध्यासा० ८२ नाहं जीवः परं ब्रह्मेत्यतद्व्यावृत्ति
पूर्वकं वासनावेगतः प्राप्त स्वाध्यासा० ८३ श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा
सार्वात्म्यमात्मनः क्वचिदाभासतः प्राप्त स्वाध्यासा० ८४ अनादानविसर्गा
भ्यामीषन्नास्ति क्रिया मुनेः तदेकनिष्ठया नित्यं स्वाध्यासा० ८५ तत्वमस्यादिवा
क्योत्थ ब्रह्मात्मैकत्वबोधतः ब्रह्मण्यात्मत्वदार्ढ्याय स्वाध्यासा० ८६ अहंभा
वस्य देहेस्मिन्निःशेषविलयावधिः सावधानेन युक्तात्मा स्वाध्यासा० ८७

प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावता तावन्निरंतरं विद्वन्स्वाध्यासापनयं कुरु ७८

निद्राया लोकवार्तायाः शब्दादेरपि विस्मृतेः क्वचिन्नावसरं दत्त्वा चिंतयात्मानमात्मनि ७९

मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः त्यक्त्वा चंडालवद्दूरं ब्रह्मीभूय कृती भव ८०

घटाकाशं महाकाश इवात्मानं परात्मनि विलाप्याखंडभावेन तूष्णीं भव सदा मुने ८१

स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ब्रह्मांडमपि पिंडांडं त्यज्यतां मलभांडवत् ८२

चिदात्मनि सदानंदे देहारूढामहंधियं निवेश्य लिंगमुत्सृज्य केवलो भव सर्वदा ८३

यत्रैष जगदाभासो दर्पणांतःपुरं यथा तद्ब्रह्माहमिति ज्ञात्वा कृ

तत्कृत्योभविष्यसि ५४ यत्सत्यमनंतंनिजरूपमाद्यं चिदद्वयानंदमरूपमक्रियं तदेवा
स्मि प्याव पुरस्तु जैतद्वैलक्षवदेवप्रमुपाजमात्मनः ५५ सर्वात्मनाहं परमस्मि देवमे
वनैवाहमयं द्वाणिकत्वदर्शीनात्तज्जानाम्यहं सर्वमिति प्रतीतिः कुतोहम
देः स्याणिकस्य सिद्धतू ५६ अहंपदार्थस्त्वहमादिसाक्षी नित्यं सुषुप्ता
वपिभावदर्शीनात्तद्ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं ततः प्रगात्मास्मद
द्विलक्षणः ५७ विकारिणां सर्वविकारवेत्ता नित्याविकारो भवितुं समर्हति
मनोरथस्वप्नसुषुप्तिषु स्फुटं पुनः पुनर्दृष्टमसत्त्वमेतयोः ५८ अतोभिमा
नं त्यज मांसपिंडे पिंडाभिमानिन्यपि बुद्धिकल्पिते कालत्रयाबाध्यमखंडबोधं

ज्ञात्वा स्वमात्मानमुपैति शांतिः ९८ सजातिमानं कुलगोत्रनामरूपाश्रमेष्वाद्रशवा
श्रितेपुलिंगस्यधर्मानपिकर्तृतादीं स्वकायवास्वंउ सुखरूपः २०० संत्यन्ये प्रति
बंधाः पुंसः संसारहेतवो दुष्टाः जेषामेयां मूलं प्रथमविकारो भवत्यहंकारः
१ यावत्स्यात्स्वस्य संबंधो हंकारेण दुरात्मना तावन्नलेशमात्रापि मुक्तिवा
र्ता विलक्षणा २०२ ग्रहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते चंद्रवद्वि
मलः पूर्णः सदानंदः स्वयंप्रभः २ योवापुरे सोहमिति प्रतीतो बुद्ध्याविकॢ
प्तस्तमसातिमूढया तस्यैव निःशेषतया विनाशे ब्रह्मात्मभावः प्रतिबंधशू
न्यः ४ ब्रह्मानंदनिधिर्महाबलवताहंकारघोराहिना संवेष्ट्यात्मनि र

स्मातेगुणमयैश्चैरुच्चैर्विभिर्मिस्त्राकैः विद्वानानन्दमहासिनाच्युतिमत्ता विच्छिद्य प्रीये
त्रयंति सुस्माहितमिमं निधिं सुखकरं धीरो नु भोक्तुं क्षमः ॥१॥ यावद्वायविंचिद्विषदे
व स्फुर्तिरसिचेद्देहकपमारोग्यायमवेतद्वद्देहंजापि योगिनो मुक्तये द
त्र देहोतंततनिवृत्यानतन्त्रातनानाविकल्पसंदृत्या प्रत्यक्त्वविवेकादिदमह
मस्मीति विंदते तत्त्वं ॥७॥ अहंकारेकर्तृत्वेहमितिमतिं मुंचसद्दसविकारात्मन्या
त्मप्रतिफलं तु विस्वस्थितिमुविय दध्यासात्मा[illegible] जनिमृतिजरादुःखबहुलात्तीव्र
श्चिन्मूर्तेस्त्वं सुखतनोः संसृतिरियं ॥८॥ सदैककरूपस्य चिदात्मनो विभोरानंद
मूर्तेरनवद्यकीर्तेः नैवान्यथा क्वाप्यविकारिणस्ते विनाहमध्यासममुष्य संसृतिः
॥९॥ तस्माद्दहंकारमिमं स्वशत्रुं भोक्तुर्गले कंटकवत्प्रतीतं विच्छिद्य विज्ञानमहासिना

स्फुटं च स्वात्मसाम्राज्यसुखं यत्पदं ॥१०॥ ततोद्भमा देवि निवर्त्य वृत्तिं संत्यक्तरागः
परमार्थलाभात् तूष्णीं समास्वात्म सुखानुभूत्या पूर्णात्मना ब्रह्मणि
निर्विकल्पः ॥११॥ समूलकृत्तोपि महानहं पुनर्व्युल्लेखितः स्याद्यदि चेतसा
क्षणं संजीव्य विक्षेपशतं करोति नभस्वता प्रावृषि वारिदो यथा ॥१२॥ नि
गृह्य शत्रोरहमोवकाशः क्वचिन्न देयो विषयानुचिंतया स एव संजीवन
हेतुरस्य प्रक्षीणजंबीरतरोरिवांबु ॥१३॥ देहात्मना संस्थित एव कामी वि
लक्षणः कामयिता कथं स्यात् अतोर्थसंधानपरत्वमेव भेदप्रसक्त्या
भवबंधहेतुः ॥१४॥ कार्यप्रवर्द्धनाद्बीजप्रवृद्धिः परिदृश्यते कार्यनाशाद्बि

जनाश्रात्मस्मात्कार्यं निरोधयेत् ॥१७॥ वासनावृद्धितः कार्यं कार्यवृद्ध्या च वासना वर्द्ध-
ते सर्वथा पुंसः संसारो न निवर्तते ॥१८॥ संसारबंधविछित्यै तद्द्वयं प्रदहेद्यतिः वासना-
वृद्धिरेताभ्यां चित्तया क्रियया वृतिः ॥१७॥ ताभ्यां प्रवृद्धिमाना सा सूते संसृतिमात्म-
नः ॥ त्रयाणां च क्षयोपायः सर्वावस्थासु सर्वदा ॥१८॥ सर्वत्र सर्वतः ब्रह्ममात्राव-
लोकेन सद्भाववासनादार्ढ्यं । तत्त्रयं लयमश्नुते ॥१९॥ क्रियानाशे भवेच्चिंतानाशोस्मा-
द्वासनक्षयः वासनाप्रक्षयो मोक्षः स जीवन्मुक्तिरिष्यते ॥२०॥ सद्वासनास्फूर्तिविजृ-
म्भणे सत्यसौ विलीना ह्यहमादिवासना अतिप्रकृष्टाप्यरुणप्रभायां विलीयते साधु
यथा तमिस्रा ॥२१॥ तमस्तमःकार्यमनर्थजालं न दृश्यते सत्युदिते दिनेशे तथाद्वया-
नंदरसानुभूतौ नैवास्ति बंधो न च दुःखगंधः ॥२२॥ दृश्यं प्रतीतं प्रविलापयन्स्वा-

न्मात्रमानंदघनं विभाति न समाहितः सन्बहिरंतरं वा कालेन येषाः सति कर्मबंधे २३
प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन प्रमादो मृत्युरित्याह भगवान्ब्रह्मणः
सुतः २४ न प्रमादादनर्थोन्यो ज्ञानिनः स्वस्वरूपतः ततो मोहस्ततोहंधीः
ततो बंधस्ततो व्यथा २५ विषयाभिमुखं दृष्ट्वा विद्वांसमपि विस्मृतिः विक्षे
पयति धीदोषैर्योषा जारमिव प्रियं २६ यथापकृष्टं शैवालं क्षणमात्रं
तिष्ठति आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखं २७ लक्ष्यच्युतं चेद्य
दि चित्तमीषद्बहिर्मुखं सन्निपतेत्ततस्ततः प्रमादतः प्रच्युतकेलिकं
दुकः सोपानपंक्तौ पतितो यथा तथा २८ विषयेष्वाविशेच्चेतः संकल्पयति
तद्गुणान् सम्यक्संकल्पनात्कामः कामात्पुंसः प्रवर्तनं २९ ततस्स्वरू

पवित्रं शोविभ्रष्टस्तु पतत्यधः पतितस्य विना नाशं पुनर्नारोह इद्धं दृष्टं ते २० संकल्प
वर्जनं स्मात्सर्वानर्थस्य कारणं अतः प्रमादान्न परोस्ति मुमुक्षुर्विवेकिनो ब्र
ह्मविदः समाधौ समाहितः सिद्धिमुपैति सम्यक् प्रमादितो ज्ञानमवसावधानः सु
जीवतो यस्य कैवल्यं विदेहे च स केवलः २२ यत्किंचित्स्यात्तो भेदं भयं ब्रूते यजुः
श्रुतिः यदा कदा वापि विपश्चिदेष ब्रह्मण्यनंतेप्यणुमात्रभेदं पश्यत्यथा
मुष्य भयं तदेव यद्वीक्षितं भिन्नतया प्रमादात् २३ श्रुतिस्मृतिन्या
यशतैर्निषिद्धे दृश्येत्र यः स्वात्ममतिं करोति उपैति दुःखोपरि दुःखजा
तं निषिद्धकर्ता समलिम्लुचो यथा २४ सत्याभिसंधानरतो विमुक्तो
महत्त्वमात्मीयमुपैति नित्यं मिथ्याभिसंधानरतस्तु नश्येत् दृष्टं तदेतद्य

दचोरचोरयोः २५ यजिरसदनुसंधिं बध्नंतु विद्याय स्वयमयमसम
स्मिन्नात्मदृष्टैवतिष्टतु सुखं यतिननुनिष्टा ब्रह्मणि स्वानुभूत्याह
रतिपरमविधाकायै दुःखं प्रतीतं २६ बाह्यानुसंधिः परिवर्द्ध
येत्फलं दुर्वासनामेव ततस्ततो धिकां ज्ञात्वा विवेकपरिहृ
त्य बाह्यं स्वात्मानुसंधिः विदधातनिरंतरं २७ वाक्येनि सृष्ट
मनसः प्रसन्नता मनः प्रसादे परमात्मदर्शनं तस्मिन्सु
दृष्टे भवबंधनाशो बहिर्निरोधः पदवी विमुक्तेः २८ कः
पंडितः सन्सदसद्विवेकी श्रुतिप्रमाणैः परमार्थदर्शी

ज्ञानस्विकुर्यादसतोर्वत्तंबंस्वपातदेतोःशिष्युवन्मुमुक्षुः ३९ देहादिसं
सक्तिमतो न मुक्तिर्मुक्तस्य देहाद्यभिमत्यभावः सुप्तस्य नो जागरणं न जाग्रतः
स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ४० अंतर्बहिःस्वं स्थिरजंगमेषु ज्ञानात्मना
धारतया विलोक्य त्यक्ताखिलोपाधिरखंडरूपः पूर्णात्मना यः स्थित एष मुक्तः ४१
ना
सर्वात्मना बंधविमुक्तिहेतुः सर्वात्मभावान्न परोस्ति कश्चित् दृश्याग्रहे सत्यु
पपद्यतेसौ सर्वात्मभावोस्य सदात्मनिष्ठया ४२ दृश्यस्याग्रहणं कथं
नु घटते देहात्मना तिष्ठतो बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां कुर्वतः
संन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैः तत्त्वज्ञैः करणीयमात्मनि
सदानंदेच्छुभिर्यत्नतः ४३ सार्वात्म्यसिद्धये भिक्षोः कृतश्रवणकर्मणः
समाधिं विदधात्येषा शांतो दांत इति श्रुतिः ४४ आरूढशक्तेरहमो विना

शः कर्तुं न शक्यः सदस्यापि पंडितैः येनिर्विकल्पाख्यसमाधिनिश्चलास्तेनंत
रानंतमवादिवासनोः ५५ कं हेतुर्वेव मोदिन्या पोजपित्वा देजे बैलाद्
विक्षेपशक्तिः पुरुषं विक्षेपयति तदुक्तं ५६ विक्षेपशक्तिर्विजयो वि
षमो विधातुं निःशेषमावरणशक्ति निवृत्यभावे दृग्दृश्ययोः स्फुट
पयोजलवद्विभागे न स्यात्तदावरणमात्मनि च स्वभावतः ५७ निःसंश
येन भवति प्रतिबंधशून्यो विक्षेपणं न यदि चेन्मृषार्थैः सम्यग्विवेकः
स्फुटबोधजन्यो विभज्य दृग्दृश्यपदार्थतत्त्वं ५८ छिनत्ति मायाकृत
मोहबंधं यस्माद्विमुक्तस्य पुनर्न संसृतिः परावरैकत्वविवेकवह्नि
दहत्यविद्यागहनं ह्यशेषं ५९ किं स्यात्पुनः संसरणस्य बीजमद्वै

नमावं समुपेयुषोऽस्य ॥२५०॥ आवरणस्य निवृत्तिर्भवति च सम्यक्प्रदायं दर्शी
नातः मिथ्याज्ञानविनाशस्तादिदोषपजनितदुःखनिवृत्तिः ॥२५१॥ तत्त्वज्ञानि
यं दृष्टं सम्यग्गुरुस्वरूपं विजानात् तस्माद्गुरुसत्तत्त्वं ज्ञातव्यं बंधमुक्त
येर्विदूषा ॥२५२॥ अयोनियागादि वसतत्त्व मत्वया आत्मादि रूपेण विजृंभते ध्रुः
तत्त्वार्यं मेत्रिनं यं यतो मषाद्दृष्टं मे सस्वप्र मनोवेपबु ॥२५३॥ अज्ञानविको
नाः प्रकृतेरदमुखादेशवासना विषयास्त्र सर्वे दृष्टोऽन्यथाभाविजय
स्य मीषामसत्वमात्मानुकदापिनान्यथा ॥२५४॥ नित्यादेयास्वरूपचिद्
करूपोनु अमादिसा श्रीसदसद्विलक्षणः आनंदपदे प्रत्ययलक्षि
तार्थः प्रमकन्नानंदघनः परमात्मा ॥२५५॥ उक्तविप्र[illegible]तस्ये दर्शद्विमे
ज्यनिश्चित्यतत्त्वं निजबोधदृष्ट्या ज्ञात्वा स्वमात्मानमखंडबोधं तेष्यो

विमुक्तः स्वयमेव शाम्यति ३५४ अज्ञानहृदयग्रंथेर्निःशेषविलय
स्तदा समाधिनाविकल्पेन यदाद्वैतात्मदर्शनं ३५५ त्वमहमिद
मितीयं कल्पना बुद्धिदोषात्प्रभवति परमात्मन्यद्वये निर्विशेषे
प्रविलसति समाधावस्य सर्वो विकल्पो विलयनमुपगच्छेद्वस्तु
तत्वावधृत्या ३५६ शांतो दांतः परमुपरतः क्षांतियुक्तः समाधिं कुर्व
न्नित्यं कलयति यतिः स्वस्य सर्वात्मभावं तेनाविद्यातिमिरजनिता
न्साधु दग्ध्वा विकल्पान्ब्रह्माकृत्या निवसति सुखं निःक्रियो निर्वि
कल्पः ३५७ समाहिता ये प्रविलाप्य बाह्यं श्रोत्रादि चेतः स्वमहं
चिदात्मनि त एव मुक्ता भवपाशबंधैर्नान्ये तु पारोक्ष्यकथाभिधायिनः

२७२ उपाधियोगात्स्वयमेव भिद्यते चोपाध्यपोहे स्वयमेव केवलः
तस्मादुपाधेर्विलयाय विद्वान्वसेत्सदाकल्पसमाधिनिष्ठया २७
३ सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया कीटको भ्रमरं ध्यायन्भ्रमरत्वाय
कल्पते २७४ क्रियांतरासक्तिमपास्य कीटको ध्यायन्नलित्वं ह्यलिभा
वमृच्छति तथैव योगी परमात्मतत्वं ध्यात्वा समायाति तदेकनिष्ठया
२७५ अतीव सूक्ष्मं परमात्मतत्वं न स्थूलदृष्ट्या प्रतिपत्तुमर्हति स
माधिनात्यंतसुसूक्ष्मवृत्त्या ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः २७६ यथा सु
वर्णं पुटपाकशोधितं त्यक्त्वा मलं स्वात्मगुणं समृच्छति तथा मनः सत्वर
जस्तमोमलं ध्यानेन संत्यज्य समेति तत्वं २७७ निरंतराभ्यास

वशात्तदित्थं पक्वं मनो ब्रह्मणि लीयते यदा तदा समाधिः सविकल्प
वर्जितः स्वतोऽद्वयानंदरसानुभावकः २८८ समाधिनानेन समस्तवा
सनाग्रंथेर्विनाशोऽखिलकर्मनाशः अंतर्बहिः सर्वत एव सर्वदा स्व
रूपविस्फूर्तिरयत्नतः स्यात् २८९ श्रुतेः शतगुणं विद्यान्मननं मन
नादपि निदिध्यासं लक्षगुणमनंतं निर्विकल्पकं २९० निर्विक
ल्पकसमाधिना स्फुटं ब्रह्मतत्त्वमवगम्यते ध्रुवं नान्यथा चल
तया मनोगतेः प्रत्ययांतरविमिश्रितं भवेत् २९१ अतः समाधत्स्व य
तेंद्रियः सन्निरंतरं शांतमनाः प्रतीचि विध्वंसय ध्वांतमनाद्यविद्यय
कृतं सदेकत्वविलोकनेन २९२

योगस्य प्रथमं द्वारं वाङ्निरोधः परिग्रहः। निराशा च निरीहा च नित्यमेकान्तशीलता ॥७२॥ एकान्तस्थितिरिन्द्रियोपरमणे हेतुर्दमः प्रोक्तः। संरोधे करणं शमेन विलयं यायादहंवासना। तेनानन्दरसानुभूतिरचला ब्राह्मी सदा योगिनस्तस्माच्चित्तनिरोध एव सततं कार्यः प्रयत्नान्मुनेः ॥७४॥ वाचं नियच्छात्मनि तन्नियच्छ बुद्धौ धियं यच्छ च बुद्धिसाक्षिणि। तं चापि पूर्णात्मनि निर्विकल्पे विलाप्य शान्तिं परमां भजस्व ॥७५॥ देहप्राणेन्द्रियमनोबुद्ध्यादिभिरुपाधिभिः। यैर्यैर्वृत्तेः समायोगस्तत्तद्भावोऽस्य योगिनः ॥७६॥ तन्निवृत्त्या मुनेः सम्यक्सर्वोपरमणं सु-

स्वं संदृश्यते सदानंदरसानुभवविप्लवः ७७ ज्ञातृत्वाग्रो बहिस्त्यागो
विरक्तिस्यैव युज्यते त्यजत्यंतर्बहिः संगं विरक्तस्तु मुमुक्षया ७८ बहि
स्तु विषयैः संगं तथांतरहमादिभिः विरक्त एव शक्नोति त्यक्तुं ब्रह्मणि नि
ष्ठितः ७९ वैराग्यबोधौ पुरुषस्य पक्षिवत्पक्षौ विजानीहि विचक्षण त्वं
विमुक्तिसौधाग्रलताधिरोहणं ताभ्यां विना नान्यतरेण सिध्यति ८०
अत्यंतवैराग्यवतः समाधिः समाहितस्यैव दृढप्रबोधः प्रबुद्धतत्व
स्य हि बंधमुक्तिर्मुक्तात्मनो नित्यसुखानुभूतिः ८१ वैराग्यान्न परं सुख
स्य जनकं पश्यामि वश्यात्मनः तच्चेच्छुद्धतरात्मबोधसहितं स्वाराज्य
साम्राज्यधुक् एतद्द्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं सर्व

ज्ञास्य स्य यास दात्मनि स दा प्रज्ञां कुरु श्रेयसे ८२ आशंकि धिविवोपमे
षु विषयेषु येव म्रत्यो: मतिस्स्पृह्का जातिकुला श्रमे षभिमतिं मुं चातिदू
रात्किया: दे सदाव सतित्यजा मधियं णं प्रज्ञां कुरु षामति त्वं दृष्टास्य
मलो सिनि देय परं ब्रह्मासि यद्वस्तुतः ८२ लक्ष्य ब्रह्मणि मानसंद्द
ढतरे स स्थाप्य बाह्यचिंद्रियं स्वस्थाने विनिवेश्यनि श्चल तनु श्राप
श्रदे रु स्थितिं ब्रह्मात्मै स मुपेत्य तन्मय तत या ची रेव ३ वृत्याति
शं ब्रह्मानंद रसं पिवात्मनि मुदा पूज्ये: किमत्यै नै श २८ आनाम
वि त ने त्यांकाक्ष मलं दुःखकारणं चिंतयात्मन मानंद रूपं यन्मुक्ति

कारणं ॥ एष स्वयंज्योतिरशेषसाक्षी विज्ञानकोशे विलसत्यजस्रं ल
क्ष्यं विधायैनमसद्विलक्षणमखंडवृत्त्यात्मतयानुभावय ॥ एतम
च्छिन्नया वृत्त्या प्रत्ययांतरशून्यया उल्लेखयन्विजानीयात्स्वस्वरू
पतया स्फुटं ॥ अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् उ
दासीनतया तेषु तिष्ठेत्स्फुटघटादिवत् ॥ विशुद्धमंतःकरणं
स्वरूपे निवेश्य साक्षिण्यवबोधमात्रे शनैः शनैर्निश्चलतामु
पानयन्पूर्णत्वमेवानुविलोकयेत्ततः ॥ देहेंद्रियप्राणम

नोदमादिभिः स्वाज्ञानक्लृप्तैरखिलैरुपाधिभिः विमुक्तमात्मा
नमखंडरूपं पूर्णं महाकाशमिवावलोकयेत् ॥५०॥ घटक
लशकुसूलसूचिमुखैर्गगनमुपाधिशतैर्विमुक्तमेकं भवति न
विविधं तत्तथैव शुद्धं परमहमादिविमुक्तमेकमेव ॥५१॥ ब्रह्मा
दिस्तंभपर्यंता मृषामात्रा उपाधयः ततः पूर्णं स्वमात्मानं पश्येदे
कात्मना स्थितं ॥५२॥ यत्र भ्रांत्या कल्पितं तद्विवेके तत्तन्मात्रं नैव तत्
स्माद्विभिन्नं भ्रांतेर्नाशे भाति दृष्टाहितत्वं रज्जुस्तद्वद्विश्वमात्मा

स्वरूपं च स्वयं ब्रह्मा स्वयं विष्णुः स्वयं रुद्रः स्वयं शिवः स्वयं विश्व
मिदं सर्वं स्वस्मादन्यन्न किंचन ॥ अन्तः स्वयं चापि बहिः स्वयं
च स्वयं पुरस्तात्स्वयमेव पश्चात् स्वयं ह्यवाच्यां स्वयमप्यु
दीच्यां तथोपरिष्टात्स्वयमप्यधस्तात् ॥ तरंगफेनभ्रमबुद्बु
दादि सर्वं स्वरूपेण जलं यथा तथा चिद्देहदेहाद्यहमेतदेत
त्सर्वं चिदेव केवलं स विष्णुः ॥५६॥ स देवो दैत्यः सर्वं जगदेव गतं वा
ऽनन्तः स यो मनोज्ञं त्वनात्मेयं वस्तु कुतः परमात्मनि स्थितं तत्त्वतः प्रपञ्च किं
मेतना याः कलशाघटकुंभाद्यवगतं व देवत्वमाप्तं तत्स्वस्मत् सन्मिति

मायामदिरया ॥ क्रियासमभिहारे ॥ यत्र नान्य दिति श्रुतिः ब्रवीति
दैतनासित्यंमिथ्याध्यासनिवृत्तये ॥ आकाशावन्निर्मलनिर्विकल्पनिः
सीमनिष्यंदननिर्विकारं अंतर्बहिः शून्यमनन्यमद्वयं स्वयंपरं ब्रह्म
किमस्ति बोध्यं ॥ वक्तव्यं किमुविद्यतेत्र बहुधा ब्रह्मैव जीवः स्वयं
ब्रह्मैव जीवः स्वयं ब्रह्मैतज्जगदापराणुसमलं ब्रह्माद्वितीयं
श्रुतिः ब्रह्मेवाहमितिप्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं ब्रह्मीभवंत
संतिसंततचिदानंदात्मनेतद्ध्रुवं ॥ ८० ॥ जहिमलमयकोशं धियो

त्यापि जा शां प्र स म मनि ल क ले से लिं ग दे दे पि प ध्या त नि ग म ग दि
न की जिं नित्य मा नं द म जें स्व य मि त्ति प दि ची य ब्रह्म रू पे णा ति ष्ट ९ शि
वा कारं या व द्र जं त्ति म नु ज स्त्रा व द श्रु वि: प रे न्य: सो न्हे ग्रा ज न न
म र णा व्या धि नि ल या: व द्या त्म नं श्रु द्ध ब्रह्म य ति शि वा को र म च ले
त दा ति न्यो मे जो भ व ति दि त दा द श्रु ति र पि ४० २ स्वी मि न्या
रा पि जा रा षा भा स व स्तु नि रा स त: स्व मे व प रे ब्रह्म रू पी म द्व य
म वि ना यं सा स मा दि ता यां सं ति चि न वृ त्ता प र मा त्म नि ब्र ह्म णि
वि क ले न द्र स्य ते के ब्रि द यं वि क ल्प: प्र ज्ञा ले मा त्रे: प रि शि ष्य ते

त्तः ४०४ आत्मा सकलो विकल्पो यं विश्वमित्यस्य कवस्तुनि निर्विकारे नि

राकारे निर्विशेषे भिदा कुतः ४०५ दृष्टदर्शनदृश्यादिभावशून्यैक

वस्तुनि निर्विकारे निराकारे निर्विशेषे भिदा कुतः ४०६ कल्पा

र्णव इवात्यंतपरिपूर्णैकवस्तुनि निर्विकारे ४०७ तेजसीव

तमो यत्र विलीनं भ्रांतिकारणं अद्वितीये परे तत्त्वे निर्विशेषे भि ४०८

एकात्मके परे तत्त्वे भेदवार्ता कथं वसेत् सुषुप्तौ सुख

मात्रायां भेदः केनावलोकितः ४०९ नह्यस्ति विश्वं परतत्त्वबो

धात्सदात्मनि ब्रह्मणि निर्विकल्पे कालत्रये नाप्यहि

हिरी क्षितो गुणेन संच भुविं दुर्मृगतदृष्ट कायां ॥ ॰ मायामात्रमिदं द्वै
तमद्वैतं परमार्थतः इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते ॥७
अनन्यत्वमधिष्ठानादारोप्यस्य निरीक्षितं पण्डितैः रज्जुसर्पा
दौ विकल्पो भ्रांतिजीवनः ॥ चित्तमूलो विकल्पोयं चित्ताभावे न क
श्चन अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि ॥१९॥ किमपि स
ततबोधं केवलानंदरूपं निरुपममतिवेलं नित्यमुक्तं निरीहं
निरवधिगगनाभं निष्कलं निर्विकल्पं हृदि कलयति विद्वान्ब्रह्म पूर्णं
समाधौ ॥४०१४॥ प्रकृतिविकृतिशून्यं भावनातीतभावं समरसमसमा

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलं स्वानंदानुभवाच्छांतिरेषैवोपरतेः फलं॥
४२१॥ यद्युत्तरोत्तराभावे पूर्वपूर्वं तु निष्फलं निवृत्तिः परमा तृप्तिरानंदोऽनुपमः स्वतः ४२२
दृष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलं यत्कृतं भ्रांतिवेलायां नानाकर्म जुगुप्सितं ४२३॥
पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति विद्याफलं स्यादसतो निवृत्तिः प्रवृत्तिरज्ञानफलं त-
दीक्षितं तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौ नो चेद्विदां दृष्टफलं किमस्मात् ४२५॥ अज्ञा-
नहृदयग्रंथेर्विनाशो यद्यशेषतः अनिच्छोर्विषयः किंनु प्रवृत्तेः कारणं स्वतः ४२६॥
वासनानुदयो भोग्ये वैराग्यस्य तदावधिः ४२७ अहंभावोदयाभावो बोधस्य
परमावधिः लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ४२८

188

विवेकचूडामणिः

[illegible]

(३५)

४४